श्रीमते रामानुजाय नमः

# ॥ श्री गायत्री रामायणम्॥

तपस्स्वाद्याय निरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्॥ १

स हत्वा राक्षसान् सर्वान् यज्ञघ्नान् रघुनन्दनः।
रिंषिभिः पूजितः सम्यग्यथेन्द्रो विजयी पुरा॥ २

विश्वामित्रः स धर्मात्मा श्रुत्वा जनकभाशितम्।
वत्स राम धनुः पश्य इति राघवमब्रवीत्॥ ३

तुष्टावास्य तदा वम्शं प्रविश्य स विशाम्पतेः।
शयनीयं नरेन्द्रस्य तदासाद्य व्यतिष्ठत॥ ४

वनवासं हि सङ्ख्याय वासांस्याभरणानि च।
भर्तारमनुगच्छन्त्यै सीतायै स्वशुरो दधौ॥ ५

राजा सत्यं च धर्मं च राजा कुलवतां कुलम्।
राजा माता पिता चैव राजा हितकरो नृणाम्॥ ६

निरीक्ष्य स मुहूर्तम् तु ददर्श भरतो गुरुम्।
उटजे राममासीनं जटावल्कल धारिणम्॥ ७

यदि बुद्धिः कृता द्रष्टुं अगस्त्यं तं महामुनिम्।
अद्यैव गमने बुद्धिं रोचयस्व महायशः॥ ८

भरतस्यार्य पुत्रस्य स्वश्रूणां मम च प्रभो।
मृग रूपमिदम् व्यक्तं विस्मयं जनयिष्यति॥ ९

गच्छ शीघ्रमितो राम सुग्रीवं तं महाबलम्।
वयस्यं तम् कुरु क्षिप्रं इतो गत्वाऽद्य राघव॥ १०

देशकालौ प्रतीक्षस्व क्षममाणः प्रियाऽप्रिये।
सुखदुःखसहः काले सुग्रीव वशगो भव॥ ११

वन्द्यास्ते ति तपस्सिद्धाः तापसा वीतकल्मषाः।
प्रष्टव्या चापि सीतायाः प्रवृत्तिर्विनयान्वितैः॥ १२

स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कामरूपिणीम्।
विक्रमेण महतेजा हनुमान् कपिसत्तमः॥ १३

धन्या देवाः स गन्धर्वाः सिद्धाश्च परमर्षयः।
मम पश्यन्ति ये नाथं रामं राजीवलोचनम्॥ १४

मङ्गलाभिमुखी तस्य सा तदासीन् महाकपेः।
उपतस्थे विशालाक्षी प्रयता हव्यवाहनम्॥ १५

हितं महार्थं मृदु हेतु संहितं व्यतीत कालायति संप्रतिक्षमम्।
निशम्य तद्वाक्यमुपस्थितज्वरः प्रसङ्गवान् उत्तरमेतदब्रवीत्॥ १६

धर्मात्मा रक्षसां श्रेष्ठः संप्राप्तोऽयं विभीषणः।
लङ्कैश्वर्यं धृवं श्रीमान् अयम् प्राप्नोत्यकण्टकम्॥ १७

यो वज्रपाताशनि सन्निपातात् न सुक्षुभे नापि चचाल राजा।
स रामबाणाभिहतो भृशार्तः चचाल चापं च मुमोच वीरः॥ १८

यस्य विक्रम मासाद्य राक्षसा निधनं गताः।
तं मन्ये राघवं वीरं नारायण मनामयम्॥ १९

न ते ददृशिरे रामं दहन्तमरिवाहिनीम्।
मोहिताः परमास्त्रेण गान्धर्वेण माहात्मना॥ २०

प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली।
बद्धाञ्जलिपुटा चेदमुवाचाऽग्नि समीपतः॥ २१

चलनात् पर्वेन्द्रस्य गणा देवाश्च कम्पिताः।
चचाल पार्वती चापि तदाश्लिष्टा महेश्वरम्॥ २२

दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादन भोजनम्।
सर्वमेवाविभक्तं नो भविष्यति हरीश्वर॥ २३

यामेव रात्रिं शतृघ्नः पर्णशालां समाविशत्।
तामेव रात्रिं सीतापि प्रसूता दारक द्वयम्॥ २४

इदं रामायणं कृत्स्नं गायत्री बीजसंयुतम्।
त्रिसन्ध्यं यः पठ्नित्यं सर्वपापैः प्रमुच्यते॥

**॥ इति श्री गायत्री रामायणम् सम्पूर्णम्॥**